BAOU Education for All | Dr. Babasaheb Ambedkar Open University (Established by Government of Gujarat) | NAAC ACCREDITED A++ | nirf 3rd Rank
A Refereed and Peer-Reviewed International e-Journal of Humanities and Social Sciences
Website: http://jyotirmay.baou.edu.in/chaitanya/ Email: chaitanya.ejournal@baou.edu.in
|| चैतन्य || CHAITANYA
ISSN: 2582 2802

Year–06, Volume –06, Issue–04, December–2025

# यज्ञदानतपस्सु त्वं दानं विद्धि धनञ्जय ।

– श्याम अनिलकुमार पटेल

**सारांश (Abstract):**

कर्मणः त्रिविधं स्वरूपं भगवद्गीतायां चर्चितमस्ति । कर्मणां सर्वथा त्यागेन मनुष्यजीवनं न सिद्ध्यति इति भगवद्गीता प्रतिपादयति । स एव सर्वेषामनुभवः । किन्तु तस्मिन्नेव ग्रन्थे कर्मसन्न्यासः अपि विहितः । यद्यपि कर्मणां सम्यक् न्यासः त्यागो वा कृतो वर्तते तथापि यज्ञ-दान-तपसां न्यासः न कर्तव्यः इति भगवता श्रीकृष्णेन उक्तमस्ति । तत्रैव गीतायां विभूतिदर्शनं कारितमस्ति । तासां विभूतीनां क्रमे यदि नूतना विभूतिः योजनीया भवति तर्हि विहितकर्मणां यज्ञदानतपसां का भगवतः विभूतिः भवितुमर्हा इति प्रश्नमाधारीकृत्य शोधपत्रेऽस्मिन् वेदव्यासप्रणीतग्रन्थेभ्यः सन्दर्भानामुल्लेखं कृत्वा यज्ञदानतपस्सु दानमेव विभूतिरूपेण प्रतिपादितं योजितञ्चास्ति ।

**कीलपदानि** (Keywords): यज्ञः, दानम्, तपः, कर्म, विभूतियोगः ।

## १. भूमिका –

श्रीमद्भगवद्गीतायाः दशमे अध्याये भगवान् श्रीकृष्णः स्वीयानां विभूतीनां विवरणं कृत्वा उपदिशति यत् –

**नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।**
**एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥४०॥**[1]

अतः जिज्ञासा जायते यत् गीतायाः दशमे अध्याये वर्णिते विभूतीनां विस्तरे इतोऽपि किं किं श्रेष्ठं योजयितुं शक्यम् । अतः विभूतियोगस्य शैलीम् ईषद् अधिकृत्य एव “यज्ञदानतपस्सु त्वं दानं विद्धि धनञ्जय” इत्यस्मिन् विषये लेखोऽयं प्रस्तूयते ।

[1] हे परंतप ! मेरी दिव्य विभूतियोंका अन्त नहीं है, मैंने अपनी विभूतियोंका यह विस्तार तो तेरे लिये एकदेशसे अर्थात् संक्षेपसे कहा है ।

Chief – Editorial Board: Prof. Ami Upadhyay, Hon'ble Vice Chancellor, BAOU, Ahmedabad.
Editor: Prof. Yogendra Parekh
Publisher: Registrar, Dr. Babasaheb Ambedkar Open University, Ahmedabad.

प्रस्तुते लेखे स्मर्तव्यमस्ति यत् जीवननिर्वाहार्थं कर्म तु कर्तव्यम् अस्ति एव[2] । यद्यपि कार्यं कर्तुं न इच्छति तथापि प्रकृतिजैः गुणैः वशीभूतः मनुष्यः कर्म करोति ।[3] किन्तु यदा कार्यं कुर्मः तदा वयं कर्मभिः बध्यामहे ।[4] अतः मुमुक्षुभिः कर्माणि तु त्याज्यानि इति मनसि विचारः उद्भवितुं शक्नोति । किन्तु त्यागस्य वा संन्यासस्य व्याजेन अपि कानिचित् कर्तव्यानि कदापि न त्यक्तव्यानि इति भगवद्गीतायाः मतमस्ति । श्रीमद्भगवद्गीतायाः अष्टादशे अध्याये यदा भगवान् संन्यासस्य त्यागस्य च स्वरूपं निरूपयति तदा यज्ञस्य दानस्य तपसः च त्यागः कदापि न कर्तव्यः इति स्वकीयं मतं प्रतिपादयन् वदति -

**यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।**
**यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥१८.०५॥**[5]
**एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।**
**कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥१८.०६॥**[6]

अर्थात् यज्ञकार्यं दानकार्यं तपः च तादृशानि आवश्यकानि कार्याणि सन्ति यानि संन्यासस्य वा त्यागस्य व्याजेन अपि न त्यक्तव्यानि । एतानि तावन्ति महत्त्वपूर्णानि कार्याणि स्युः अत एव भगवान् एतेषां त्यागात् वारयति। किन्तु एतेषाम् उपादेयता अस्माकं सामान्यजनानां जीवने का ? किं माहात्म्यमेतेषाम् ? यावत् प्रत्येकम् अत्याज्यानां कार्याणां माहात्म्यं न जानीमः तावत् अत्याज्यानां कर्मणां दानकार्यं भगवतः विभूतिः कथं भवितुम् अर्हति इति अवगन्तुं न शक्नुमः । अतः अत्र महाभारतम् एव आधारीकृत्य विषयोऽयं ज्ञातुं प्रयत्नः विधीयते ।

## २. यज्ञस्य माहात्म्यम् –

श्रीमद्भगवद्गीतायाः तृतीयेऽध्याये भगवान् यज्ञस्य माहात्म्यं स्पष्टीकरोति ।

**यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।**
**तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥३.९॥**

अर्थात् यज्ञार्थं क्रियमाणानि कार्याणि विहाय अन्येषु कर्मसु लग्नः जनः कर्मभिः बध्यते एव । अतः हे अर्जुन ! अनासक्तो भूत्वा केवलं यज्ञार्थं कर्तव्यकर्म सम्पादय । इति ।

---

[2] शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥भगवद्गीता ३.८॥

[3] कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥भगवद्गीता ३.५॥

[4] लोकोऽयं कर्मबन्धनः ॥भगवद्गीता ३.९॥

[5] यज्ञ, दान और तपरूप कर्म त्याग करनेके योग्य नहीं है, बल्कि वह तो अवश्य कर्तव्य है; क्योंकि यज्ञ, दान और तप – ये तीनों ही कर्म बुद्धिमान पुरुषोंको पवित्र करनेवाले हैं ।

[6] इसलिये हे पार्थ ! इन यज्ञ, दान और तपरूप कर्मोंको तथा और भी सम्पूर्ण कर्तव्यकर्मोंको आसक्ति और फलोंका त्याग करके अवश्य करना चाहिये; यह मेरा निश्चय किया हुआ उत्तम मत है ।

अधुना जिज्ञासा भवति यत् यदि यज्ञार्थं कृते कर्मणि कर्मबन्धनो नास्ति तर्हि यज्ञः अर्थात् किम् ? किमर्थं तत् कर्तव्यम् ? तस्य कर्ता कथं कर्मभिः न बध्यते ? एतेषां प्रश्नानामुत्तराणि भगवान् एवं ददाति यत् –

**सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।**

**अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥३.१०॥**[7]

**देवान् भावयतानेन ते देवा भावयन्तु वः ।**

**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥३.११॥**[8]

**इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ।**

**तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥३.१२॥**[9]

**यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।**

भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥३.१३॥[10]

अत्र यज्ञः तु कर्तव्यः इति ज्ञातं किन्तु यज्ञं न कुर्मः चेत् का हानिः भविष्यति इत्यपि यज्ञचक्रस्य निरूपणेन उच्यते –

**अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।**

**यज्ञाद् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥**

**कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।**

**तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥३.१४-१५॥**[11]

**एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।**

**अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥३.१६॥**[12]

---

[7] प्रजापति ब्रह्माने कल्पके आदिमें यज्ञसहित प्रजाओंको रचकर उनसे कहा कि तुमलोग इस यज्ञके द्वारा वृद्धिको प्राप्त होओ और यह यज्ञ तुमलोगोंको इच्छित भोग प्रदान करनेवाला हो ।

[8] तुमलोग इस यज्ञके द्वारा देवताओंको उन्नत करो और वे देवता तुमलोगोंको उन्नत करें । इस प्रकार निःस्वार्थभावसे एक-दूसरेको उन्नत करते हुए तुमलोग परम कल्याणको प्राप्त हो जाओगे ।

[9] यज्ञके द्वारा बढ़ाये हुए देवता तुमलोगोंको बिना माँगे ही इच्छित भोग निश्चय ही देते रहेंगे । इस प्रकार उन देवताओंके द्वारा दिए हुए भोगोंको जो पुरुष उनको बिना दिये स्वयं भोगता है, वह चोर ही है ।

[10] यज्ञसे बचे हुए अन्नको खानेवाले श्रेष्ठ पुरुष सब पापोंसे मुक्त हो जाते हैं और जो पापीलोग अपना शरीरपोषण करनेके लिये ही अन्न पकाते हैं, वे तो पापको ही खाते हैं ।

[11] सम्पूर्ण प्राणी अन्नसे उत्पन्न होते हैं, अन्नकी उत्पत्ति वृष्टिसे होती है, वृष्टि यज्ञसे होती है और यज्ञ विहित कर्मोंसे उत्पन्न होनेवाला है । कर्मसमुदायको तू वेदसे उत्पन्न और वेदको अविनाशी परमात्मासे उत्पन्न हुआ जान । इससे सिद्ध होता है कि सर्वव्यापी परम अक्षर परमात्मा सदा ही यज्ञमें प्रतिष्ठित है ।

[12] हे पार्थ ! जो पुरुष इस लोकमें इस प्रकार परम्परासे प्रचलित सृष्टिचक्रके अनुकूल नहीं बरतता अर्थात् अपने कर्तव्यका पालन नहीं करता, वह इन्द्रियोंके द्वारा भोगोंमें रमण करनेवाला पापायु पुरुष व्यर्थ ही जीता है ।

अधुना पुनः प्रश्नः जायते यत् यज्ञः नाम हविष्यद्रव्येन भवति सः एव वा ? तर्हि भगवान् अग्रे वदति यत् –

**द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।**

**स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥४.२८॥**[13]

एवं चतुर्थेऽध्याये भगवान् बहुप्रकारकानां यज्ञानां वर्णनं करोति ।

किन्तु अस्माभिः कः यज्ञः कर्तव्यः इति सारल्येन बोधयति भगवान् व्यासः । महाभारतस्य शान्तिपर्वणि शुकानुप्रश्ने वेदव्यासः स्वपुत्रं शुकदेवं यज्ञविषये इत्थं वदति –

**आलम्भयज्ञाः क्षत्राश्च हविर्यज्ञा विशः स्मृताः ।**

**परिचारयज्ञाः शूद्रास्तु तपोयज्ञा द्विजातयः ॥१२.२३२.३१॥**[14]

तर्हि अस्माभिः स्वकीयगुणकर्मानुसारं व्यासप्रोक्तः यज्ञः कर्तव्यः । अधुना अपरम् अत्याज्यं कर्म अस्ति तपः ।

## ३. तपसः माहात्म्यम् –

तपः त्रिविधं भवति । तद्यथा भगवद्गीतायाः सप्तदशेऽध्याये भगवता उक्तमस्ति –

**देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।**

**ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥१३.१५॥**[15]

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।**

**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१३.१५॥**[16]

**मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।**

**भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१७.१६॥**[17]

तपसः स्वरूपं तु ज्ञातम् । किन्तु किं माहात्म्यं तस्य इति महाभारतस्य वनपर्वणि युधिष्ठिरं प्रति वेदव्यासः वदति यत् –

---

[13] कई पुरुष द्रव्यसम्बन्धी यज्ञ करनेवाले हैं, कितने तपस्यारूप यज्ञ करनेवाले हैं तथा दूसरे कितने ही योगरूप यज्ञ करनेवाले हैं और कितने ही तीक्ष्ण व्रतोंसे युक्त यत्नशील पुरुष स्वाध्यायरूप ज्ञानयज्ञ करनेवाले हैं ।

[14] ब्राह्मणोंके लिये तप ही यज्ञ है, क्षत्रियोंके लिये हिंसाप्रधान युद्ध आदि ही यज्ञ हैं, वैश्योंके लिये घृत आदि हविष्यकी आहुति देना यज्ञ है और शूद्रोंके लिये तीनों वर्णोंकी सेवा ही यज्ञ है ।

[15] देवता, ब्राह्मण, गुरु और ज्ञानीजनोंका पूजन, पवित्रता, सरलता, ब्रह्मचर्य और अहिंसा – यह शरीरसम्बन्धी तप कहा जाता है ।

[16] जो उद्वेग न करनेवाला, प्रिय और हितकारक एवं यथार्थ भाषण है तथा जो वेद-शास्त्रोंके पठनका एवं परमेश्वरके नाम-जपका अभ्यास है, वही वाणीसम्बन्धी तप कहा जाता है ।

[17] मनकी प्रसन्नता, शान्तभाव, भगवच्चिन्तन करनेका स्वभाव, मनका निग्रह और अन्त:करणके भावोंकी भलीभाँति पवित्रता – इस प्रकार यह मनसम्बन्धी तप कहा जाता है ।

**तपसो हि परं नास्ति तपसा विन्दते महत् ।**

**नासाध्यं तपसः किञ्चिदिति बुद्ध्यस्व भारत ॥३.२५९.१६॥**[18]

तादृशानि वचनानि महाभारतस्य शान्तिपर्वणि शुकानुप्रश्ने वेदव्यासः स्वपुत्रं शुकदेवं प्रति वदति यत् –

**तपो निःश्रेयसं जन्तोस्तस्य मूलं शमो दमः ।**

**तेन सर्वानवाप्नोति यान् कामान् मनसेच्छति ॥१२.२३२.२२॥**[19]

**तपसा तदवाप्नोति यद्भूतं सृजते जगत् ।**

**स तद्भूतश्च सर्वेषां भूतानां भवति प्रभुः ॥१२.२३२.२३॥**[20]

**ऋषयस्तपसा वेदानध्यैषन्त दिवानिशम् ।**

**अनादिनिधना विद्या वागुत्सृष्टा स्वयम्भुवा ॥१२.२३२.२४॥**[21]

अस्मान् मुमुक्षुन् शारीरं वाङ्मयं तथा च मानसं तपसः आचरणं कर्तुं प्रेरयन्ति इमे श्लोकाः । सम्प्रति तृतीयम् अहेयं कार्यं दानम् ।

## ४. दानस्य माहात्म्यम् –

श्रुतौ स्मृतौ च दानकार्यस्य माहात्म्यं वर्णितम् अस्ति । अत्र दानं परितः संलग्नाः केचन अंशाः अवधातव्याः भवन्ति यत् किं नाम दानम् । किमर्थं दानं कर्तव्यम् । कस्य कस्य दानं कर्तुं शक्यम् । तथा च कस्मै कदा कथं च दानं कर्तव्यम् । दानेन का गतिः लभ्यते इत्यादयः । एतेषां अनुशीलनस्य प्रयत्नः अग्रे क्रियते ।

४.१. किं नाम दानम् ?

दीयते इति दानम् । यत् अर्थिभ्यः दीयते तत् कर्म दानम् इत्येव अर्थः अस्माकं मनसि भवति ।

४.२. किमर्थं दानं कर्तव्यम् ?

---

[18] हे भारत ! तपसे बढ़कर दूसरा कोई साधन नहीं है । तपसे मनुष्य महत्पद (परमात्मा)-को प्राप्त कर लेता है । तुम इस बातको अच्छी तरह जान लो कि तपस्यासे कुछ भी असाध्य नहीं है ।

[19] तप ही जीवके कल्याणका मुख्य साधन है । तपका मूल है शम और दम । पुरुष अपने मनसे जिन-जिन कामनाओंको पाना चाहता है, उन सबको वह तपस्यासे प्राप्त कर लेता है ।

[20] तपस्यासे वह उस परमात्मसत्ताको भी प्राप्त कर लेता है, जिससे इस जगतकी सृष्टि होती है । तपसे परमात्मस्वरूप होकर मनुष्य समस्त प्राणियोंपर अपना प्रभुत्व स्थापित करता है ।

[21] तपके ही प्रभावसे महर्षिगण दिन-रात वेदोंका अध्ययन करते थे । तप:शक्तिसे सम्पन्न होकर ही ब्रह्माजीने आदि-अन्तसे रहित वेदमयी वाणीका प्रथम उच्चारण किया ।

तर्हि अस्य उत्तरं भगवद्गीता वदति यत् आत्मनः पवित्रतां प्राप्तुम् । किन्तु सामान्यानां सर्वेषां जनानां कृते न इदम् उत्तरं तोषाय । अतः महाभारतस्य वनपर्वणि घोषयात्रापर्वणि धृतराष्ट्रस्य शकुनिं प्रति यत् वचनं प्राप्यते तदत्र प्रस्तूयते । धृतराष्ट्रः मृत्तिकायाः अपक्वस्य घटस्य रूपकमाध्यमेन वदति यत् –

**कथं न भिद्येत न च स्रवेत न च प्रसिच्येदिति रक्षितव्यम् ।**

अरक्ष्यमाणं शतधा प्रकीर्येद् ध्रुवं न नाशोऽस्ति कृतस्य लोके ॥३.२३६.२७॥[22]

अतः अस्माभिः उपार्जितं यत् द्रव्यम् अस्ति तस्य रक्षणं कर्तुकामैः यथायोग्यं दानं कर्तव्यमिति अत्र सूचितम् ।

नीतिशतकेऽपि महाराजेन भर्तृहरिणा उक्तमस्ति यत् –

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।**

**यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥४३॥**[23]

४.३. कस्मै कदा कथं च दानं कर्तव्यम् ?

सामान्यतया यस्मै यस्य वस्तुनः यदा आवश्यकता भवति तस्मै तदेव वस्तु तदा योग्यभावेन[24] दानरूपेण दातुं शक्नुमः । अस्मिन् विषये महाभारतस्य शान्तिपर्वणि शुकानुप्रश्ने वेदव्यासः स्वपुत्रं शुकदेवं प्रति वदति यत् –

**अर्हतामनुरूपाणां नादेयं ह्यस्ति किञ्चन ।**

**उच्चैःश्रवसमप्यश्वं प्रापणीयं सतां विदुः ॥१२.२३४.१५॥**[25]

महाभारतस्य वनपर्वणि अपि युधिष्ठिरं प्रति दानस्य विषये वेदव्यासः वदति यत् –

**विशेषस्त्वत्र विज्ञेयो न्यायेनोपार्जितं धनम् ।**

---

[22] यदि प्राप्त हुए धनका यथावत् वितरण न किया जायगा तो वह कच्चे घड़ेमें रखे हुए जलकी भाँती चूकर व्यर्थ नष्ट क्यों न होगा ? यह सोचकर उसकी रक्षा करना ही कर्तव्य है । यदि यथायोग्य विभाजनके द्वारा धनकी रक्षा न की जायेगी तो वह सैंकड़ो प्रकारसे बिखर जायगा । जगतमें किये हुए कर्म-फलका नाश नहीं होता—यह निश्चित है । (अतः दान करें ।)

[23] धनकी तीन ही दशाएँ है – दान, भोग एवं नाश । जो न दान देता है, न स्वयं भोग करता है; उसके धनकी तीसरी गति होती है ।

[24] तैत्तिरीयोपनिषदि शिक्षावल्ल्यां प्रोक्तं वर्तते यत् "श्रद्धया देयम् । अश्रद्धयादेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् ।" इति । [श्रद्धासे, अश्रद्धासे नहीं, आर्थिक स्थिति अनुसार, लज्जासे, भयसे तथा विवेकसे दान देना चाहिये ।]

[25] योग्य एवं पूजनीय (ब्राह्मण)लोगोंके लिये कोई भी वस्तु अदेय नहीं है । वैसे सत्पात्रोंके लिये तो उच्चैःश्रवा घोड़ा भी दिया जा सकता है, यह श्रेष्ठ पुरुषोंका मत है ।

**पात्रे काले च देशे च साधुभ्यः प्रतिपादयेत् ॥३.२५९.३२॥**[26]

अर्थात् बुभुक्षिताय भोजनं, तृषातुराय पेयम्, अर्थार्थिने धनं तथा च शिष्याय ज्ञानम् इत्यादिरूपेण दानधर्मः कर्तव्यः ।

४.४. दानेन का गतिः लभ्यते ?

अस्य प्रश्नस्य उत्तरेण सह किं किं देयं भवति तस्यापि बोधो भवति महाभारतस्य शान्तिपर्वणि शुकानुप्रश्ने । अत्र भगवान् व्यासः शुकदेवं सोदाहरणं[27] दानस्य गतिं दर्शयति ।

यथा –

- राजा सत्यसंधः स्वप्राणैः ब्राह्मणप्राणान् परित्राय दिवं गतः ।
- रन्तिदेवः वसिष्ठाय शीतोष्णा अपः प्रदाय नाकपृष्ठे महीयते ।
- आत्रेयः इन्द्रदमनः धनं दत्त्वा अनन्तान् लोकान् ययौ ।
- औशीनरः शिबिः ब्राह्मणाय शरीरं पुत्रं च दत्त्वा नाकपृष्ठं गतः ।
- काशीपतिः प्रतर्दनः स्वके नयने प्रदाय इह कीर्तिम् अमुत्र सुखम् अश्नुते ।
- देवावृधः अष्टशलाकं छत्रं दत्त्वा सप्रजं दिवं गतः ।
- अत्रिवंशजः साङ्कृतिः शिष्येभ्यः निर्गुणं ब्रह्म उपदिश्य उत्तमान् लोकान् गतः ।
- अम्बरीषः दशैकम् अर्बुदानि गवां ब्राह्मणेभ्यः दत्त्वा सराष्ट्रः दिवं गतः ।
- सावित्री दिव्यकुण्डले तथा च जनमेजयः शरीरं दत्त्वा उत्तमं लोकं जग्मतुः ।
- युवनाश्वः सर्वरत्नं प्रियस्त्रियः रम्यगृहञ्च दत्त्वा स्वर्लोकम् आस्थितः ।
- निमिः स्वराज्यं, परशुरामः तथा च राजा गयः सपत्तनां वसुन्धरां दत्तवन्तः ।
- अवर्षति पर्जन्ये वसिष्ठः प्रजाभ्यः प्रजापतिरिव जीवनदानं कृतवान् ।
- करन्धमपुत्रः राजा मरुतः अङ्गिरसे कन्यादानं कृत्वा आशु दिवं जगाम ।
- पाञ्चाल्यः राजा ब्रह्मदत्तः ब्राह्मणेभ्यः शङ्खनिधिं दत्त्वा पुण्यलोकान् प्राप्तवान् ।
- राजा मित्रसहः वसिष्ठाय प्रियपत्नीं मदयन्तीं दत्त्वा मदयन्त्या सह दिवं गतः ।
- सहस्रजित् ब्राह्मणार्थम् इष्टान् प्राणान् दत्त्वा उत्तमान् लोकान् गतः ।
- शतद्युम्नः मुद्गलाय हिरण्मयं भवनं दत्त्वा स्वर्गं गतः ।
- शाल्वराजः द्युतिमान् ऋचीकाय राज्यं दत्त्वा उत्तमान् लोकान् गतः ।

---

[26] यहाँ विशेष बात यह जाननी चाहिये कि मनुष्य न्यायसे कमाये गये धनको उत्तम देश, काल और पात्रका विचार करते हुए श्रेष्ठ पुरुषोंको दे ।

[27] श्रीमहाभारते शान्तिपर्वणि चतुस्त्रिंशदधिकद्विशततमेऽध्याये षोडशतमात् श्लोकाद् आरभ्य षड्त्रिंशत्तमश्लोकपर्यन्तम् एकविंशतिः श्लोकाः ।

- राजर्षिः लोमपादः ऋष्यशृङ्गाय स्वसुतां शान्तां दत्वा सर्वकामैः युज्यत ।
- राजर्षिः मदिराश्वः हिरण्यहस्ताय कन्यां दत्त्वा देववन्दितान् लोकान् गतः ।
- तथा च प्रसेनजित् शतसहस्रं सवत्सानां गवां दत्त्वा उत्तमान् लोकान् गतः ।

'एते चान्ये च बहवः' इत्युक्त्वा भगवान् व्यासः अस्मान् दानाय प्रेरयति इदमेव अनया सूच्या अस्माभिः ज्ञेयमस्ति । तथा च किं किं दातुं शक्नुमः इत्यस्यापि आवलिः अत्र अस्माभिः सम्प्राप्ता । एतत् सत्यं कथितम् अस्ति यत् –

**शतेषु जायते शूरः सहस्रेषु च पण्डितः ।**
**वक्ता शतसहस्रेषु दाता जायेत वा न वा ॥**[28]

## ५. यज्ञदानतपसां दानम् –

अत्याज्यानां कर्मणां यज्ञदानतपसां दानं विशेषतया महत्त्वं विदधाति । तस्य कारणानि क्रमशः प्रतिपादयामि ।

प्रथमं कारणम् अस्ति युगधर्मे परिवर्तनम् । महाभारतस्य शान्तिपर्वणि शुकानुप्रश्ने वेदव्यासः स्वपुत्रं वदति यत् –

**अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे ।**
**अन्ये कलियुगे नृणां युगह्रासानुरूपतः ॥१२.२३१.२७॥**[29]
**तपः परं कृतयुगे त्रेतायां ज्ञानमुत्तमम् ।**
**द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥१२.२३१.२८॥**[30]

अपरमेकं कारणं दानस्य दुष्करतां प्रतिपादयति । महाभारतस्य वनपर्वणि युधिष्ठिरः व्यासमुनिं प्रश्नमेकं पृच्छति यत् –

**भगवन् दानधर्माणां तपसो वा महामुने ।**
**किंस्विद् बहुगुणं प्रेत्य किं वा दुष्करमुच्यते ॥३.२५९.२७॥**[31]

तदा भगवान् व्यासः दानस्य श्रेष्ठतां बोधयन् वदति –

**दानान्न दुष्करं तात पृथिव्यामस्ति किञ्चन ।**

---

[28] स्कन्दपुराणे प्रथमे खण्डे माहेश्वरखण्डे द्वितीयाध्यायस्य सप्ततितमः श्लोकः ।

[29] युगोंके ह्रासके अनुसार सत्ययुग, त्रेता, द्वापर और कलियुगमें मनुष्योंके धर्म भी भिन्न-भिन्न प्रकारके हो जाते हैं ।

[30] सत्ययुगमें तपस्याको ही सबसे बड़ा धर्म माना गया है । त्रेतामें ज्ञानको ही उत्तम बताया गया है । द्वापरमें यज्ञ और कलियुगमें एकमात्र दान ही श्रेष्ठ कहा गया है ।

[31] (युधिष्ठिरने पूछा –) भगवन् ! महामुने ! दानधर्म एवं तपस्या – इनमेंसे किसका फल परलोकमें अधिक माना गया है ? और इन दोनोंमें कौन दुष्कर बताया जाता है ?

**अर्थे च महती तृष्णा स च दुःखेन लभ्यते ॥३.२५९.२८॥**[32]

**परित्यज्य प्रियान् प्राणान् धनार्थं हि महामते ।**

**प्रविशन्ति नरा वीराः समुद्रमटवीं तथा ॥३.२५९.२९॥**[33]

**कृषिगोरक्ष्यमित्येके प्रतिपद्यन्ति मानवाः ।**

**पुरुषाः प्रेष्यतामेके निर्गच्छन्ति धनार्थिनः ॥३.२५९.३०॥**[34]

**तस्माद् दुःखार्जितस्यैव परित्यागः सुदुष्करः ।**

**न दुष्करतरं दानात् तस्माद् दानं मतं मम ॥३.२५९.३१॥**[35]

## ६. उपसंहारः -

भगवतः विभूतयः तु अनन्ताः सन्ति एव । तत्र अर्वाचीनयुगानुसारं किं श्रेष्ठं विभूतिरूपेण प्रतिष्ठितं भवितुं शक्नोति इति विचारणीयम् आसीत् । अनियतकार्याणां नियतानि त्रीणि कार्याणि कदापि न हेयानि सन्ति इति भगवान् उपदिशति । तदा एतानि त्रीणि कार्याणि सुचारुतया तु समयस्य अल्पत्वात् न सिद्ध्यन्ति । अतः मनुष्यः तेषामपि एकम् अन्यतमं दानं भजेत् । दानस्य विभूतित्वं भगवतः व्यासस्य वचोभिः एव प्रतिपादितमस्ति । यः स्वयमपि गीताबोधकस्य भगवतः विभूतिरस्ति[36] । बृहदारण्यकोपनिषदः पञ्चमाध्यायस्य द्वितीये ब्राह्मणे प्रजापतेः स्वपुत्रान् मानवान् यः उपदेशः दकाररूपेण उपदिष्टः तस्य दकारस्य अपि अर्थः “दत्त - यूयं दानं कुरुत ।” इति । अत्र यत् शीर्षकं दत्तं वर्तते “यज्ञदानतपस्सु त्वं दानं विद्धि धनञ्जय” इत्यत्रापि भगवान् एव धनञ्जयम् अर्जुनं प्रति वदति तथा भावना कृता वर्तते । तस्य अयम् आशयः अस्ति यत् यः जनः दानं कर्तुमिच्छति सः प्रथमं न्यायेन द्वाभ्यां हस्ताभ्यां नरः इव प्रभूतं धनं सम्पादयेत् । तदनन्तरं चतुर्भिः हस्तैः नारायणः इव धनस्य दानं त्यागं वा कृत्वा परमां शान्तिं लभेत ।[37]

## ७. शोधलाभाः –

- अनेन शोधपत्रेण भगवद्गीतायाः विभूतियोगस्य व्यापकत्वं दृश्यते ।

---

[32] (व्यासजीने कहा -) तात ! दानसे बढ़कर दुष्कर कार्य इस पृथ्वीपर दूसरा कोई नहीं है । लोगोंको धनका लोभ अधिक होता है और धन मिलता भी बड़े कष्टसे है ।

[33] महामते ! कितने ही साहसी मनुष्य रत्नोंके लिये अपने प्यारे प्राणोंका मोह छोड़कर समुद्रमें गोते लगाते हैं और धनके लिये घोर जंगलोंमें भटकते फिरते हैं ।

[34] कुछ मनुष्य कृषि तथा गोरक्षाको अपनी जीविकाका साधन बनाते हैं, कुछ लोग धनकी इच्छासे नौकरी करनेके लिये दूर निकल जाते हैं ।

[35] अतः दुःख सहकर कमाये हुए धनका परित्याग करना अत्यन्त कठिन है । दानसे बढ़कर दूसरा कोई दुष्कर कार्य नहीं है । इसलिये मेरे मतमें दान ही सर्वश्रेष्ठ है ।

[36] मुनीनामप्यहं व्यासः । (भगवद्गीता १०.३७)

[37] त्यागाच्छान्तिरनन्तरम् । (भगवद्गीता १२.१२)

- इदं शोधपत्रं यज्ञस्य दानस्य तपसश्च स्वरूपं स्पष्टीकरोति ।
- कदापि एतेषां त्रयाणां कार्याणां लोपः न भवेत् तदर्थं विवेको जायते ।
- दानधर्मस्य वहनाय प्रेरणां जनयति ।

॥ इति शम् ॥

## ८. सहायकग्रन्थसूचिः


१. नीतिशतकम् – भर्तृहरिविरचितम् । व्याख्याकार – डो. श्रीकृष्णमणि त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, Year 2017.

२. श्रीमहाभारतम् – श्रीवेदव्यासप्रणीतम् (खण्डाः – १,२,४,५,६)। गीताप्रेस, गोरखपुर, १४तमी आवृत्तिः, २०७० तमे वैकमेऽब्दे ।

૩. પતંજલિના યોગસૂત્રો, અનુવાદ- રામકૃષ્ણ તુલજારામ વ્યાસ, સંસ્કૃત સાહિત્ય અકાદમી, ગાંધીનગર, તૃતીય આવૃત્તિ, વર્ષ ૨૦૧૮.

૪. સંસ્કૃત વાક્યસંરચના, વસન્તકુમાર મ. ભટ્ટ, સરસ્વતી પુસ્તક ભંડાર, અમદાવાદ, revised edition year 2019-20.

५. https://sa.wikisource.org/wiki/
accessed on 08th Oct, 2025



**श्याम अनिलकुमार पटेल**,

**शोधछात्र**, संस्कृत विभाग, भाषा साहित्य भवन, गुजरात विश्वविद्यालय, अहमदाबाद;

**सहायक प्राध्यापक** – भारतीय ज्ञान परंपरा (IKS), स्कूल ऑफ ह्यूमैनिटीज़ एंड सोशल साइंसेज,

डॉ. बाबासाहेब आंबेडकर ओपन यूनिवर्सिटी, अहमदाबाद।

E-Mail: shyam16.patel@gmail.com | ORCID ID: 0009-0001-0201-7135